प्रवेश सं० ——— विषयः पुराणेतिहासम् क्रम सं० ———

नाम पुराणोत्पत्तिः पद्मपुराणपी अ... ग्रन्थकार ———

पत्र सं० १-४

श्लोक सं० ——— अक्षर सं० (पंक्तौ) ३४ पंक्ति सं० (पृष्ठे) १२

आकार: ९.६" × ४.३" लिपि: दे.ना. आधारः कागज

वि० विवरणम् अपू०

14424

आ. ५१४८

पी० एस० यू० पी०—७७ एम० सी० ई०—१९५१—५० ०००

Indira Gandhi National
Centre for the Arts

ासंहे०

॥१॥ पृथ्वीचंद्रोदयेस्मृत्यंतरे॥ मनुर्बृहस्पतिर्दक्षोगौतमोथयमोंगिराः॥ योगीश्वरःप्रचेताश्च
शातातपपराशरौ॥ संवर्त्तोशनसौशंखलिखितावत्रिरेवच॥ विष्णुपस्तंबहारीताधर्मशा
स्त्रप्रवर्त्तकाः॥ एतेह्यष्टादशप्रोक्तामुनयोनियतव्रताः॥ उपस्मृतिकारस्तुअंगिरैःप्रोक्ताः॥ सा३
जाबालिर्नाचिकेतश्चस्कंदोलौगाक्षिकाश्यपौ॥ व्यासःसनत्कुमारश्चशंतनुर्जनक
स्तथा॥ व्याघ्रःकात्यायनश्चैवजातूकर्णःकपिंजलः॥ बोधायनश्चकाणादोविश्वा
मित्रःस्तथैवच॥ पैठनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः॥ वसिष्ठोनारदश्चैवसुमं
तुश्चपितामहः॥ बुधःकार्ष्णाजिनिःसत्यव्रतोगार्ग्यश्चदेवलः॥ जमदग्निर्भरद्वाजः
क पुलस्त्यःपुलहःक्रतुः॥ आत्रेयःछागलेयश्चमरीचिर्वत्सएवच॥ पारस्करोऋष्यशृं
गोवैजवापस्तथैवच॥ इत्यन्येस्मृतिकर्त्तारएवंशातितीरिताः॥ स्कांदेप्रा[illegible]॥ भा
सखंडे॥ ब्राह्मंपुराणंप्रथमंपाद्मंवैष्णवमेवच॥ शैवंभागवतंश्चैवभविष्यंनार ॥१॥
दीयकं॥ मार्कंडेयमथाग्नेयंब्रह्मवैवर्त्तमेवच॥ लैंगंतथाचवाराहंस्कांदंवामन
मेवच॥ कौर्मंमात्स्यंगारुडंचब्रह्मांडंतदनंतरं॥ अष्टादशंसमुद्दिष्टंसर्वपापप्रणाशनं॥

क४

८३

एकमेवपुराह्यासीत्ब्रह्मांडंशतकोटिधा॥ तदष्टादशधाकृत्वावेदव्यासोयुगेयुगे॥
प्रख्यापयतिलोकेस्मिन्साक्षान्नारायणांशजः॥ अन्यान्युपपुराणानिनाक
निकर मौथितानितु॥ तानिवःकथयिष्यामिसंक्षेपाद्यवधार्यतां॥ आद्यंसनत्कुमारो
क्तंनारसिंहमतःपरं॥ तृतीयंनांदमुद्दिष्टंकुमारेणतुभाषितं॥ चतुर्थंशिवधर्मो
नोप ख्यंसाक्षान्नंदीशभाषितं॥ दुर्वाससैक्तमाश्चर्यंनारदोक्तमथापरं॥ कापिलंमा
नवंचैवतथैवोशनसेरितं॥ ब्रह्मांडंवारुणंचान्यत्कालिकाह्वयमेवच॥ माहे
श्वरंतथासांबंसौरंसर्वार्थसंचयं॥ पाराशरोक्तमपरंमारीचंभार्गवाह्वयं॥ एतान्यु
पपुराणानिकथितानिद्विजोत्तमाः॥ ब्रह्मणाभिहितंपूर्वंयावन्मात्रंमरीचये॥
ब्राह्मंदशसहस्रंपुराणंपरिकीर्त्यते॥ एतदेवयदापद्मंमभूद्धैरण्मयंजगत॥ तद्व
त्तांतश्चयत्तद्वत्पाद्ममित्युच्यतेबुधैः॥ पाद्मंतत्पंचाशत्सहस्राणीहपठ्यते॥ वारा

Indira Gandhi National Centre for the Arts

हकल्पवृत्तांतमधिकृत्यपराशरः॥ यत्राहधर्मानखिलांस्तल्लोकेवैष्णवंविदुः॥
२विं त्रयोविंशतिसाहस्रंपुराणंतत्प्रकीर्तितं॥ श्वेतकल्पप्रसंगेनधर्मान्वायुरिहाब्रवीत्॥
यत्रतद्वायवीयंस्याद्रुद्रमाहात्म्यसंयुतं॥ चतुर्विंशतिसाहस्रंवायवीयमुदाहृतं॥
यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः॥ वृत्रासुरवधोपेतंतद्भागवतमुच्यते॥
सारस्वतस्यकल्पस्यमध्येयेस्युर्नरामराः॥ तद्वृत्तांतोद्भवंलोकेतच्चभागवतंस्मृ
तं॥ अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितं॥ यत्राहनारदोधर्मान्बृहत्कल्पाश्र
यांसिह॥ पंचविंशसहस्राणिनारदीयंतदुच्यते॥ यत्राधिकृत्यशकुनीन्धर्माध
र्मविचारणं॥ पुराणंनवसहस्रंमार्कंडेयमिहोच्यते॥ यत्तदीशानकल्पस्यवृत्तां
कृत्य तमधिगम्यच॥ वसिष्ठायाग्निनाप्रोक्तमाग्नेयंतत्प्रचक्षते॥ तच्चषोडशसाह
स्रंसर्वक्रतुफलप्रदं॥ यत्राधिकृत्यमाहात्म्यमादित्यस्यचतुर्मुखः॥ अघोर ॥२॥

कल्पवृत्तांतप्रसंगेनजगत्स्थितिः॥ मनवेमानवंधर्मंकथयामासविस्तरं॥ चतुर्दशा
सहस्राणितथापंचशतानिच॥ भविष्यच्चरितप्रायंभविष्यंतदिहोच्यते॥ राथंतरस्य
कल्पस्यवृत्तांतमधिकृत्यच॥ सावर्णिनानारदायकृष्णमाहात्म्यसंयुतं॥ यत्रब्र
ह्मवराहस्यचरितंवर्ण्यतेमहत्॥ तदष्टादशसाहस्रंब्रह्मवैवर्तमुच्यते॥ यत्राग्नि
लिंगमध्यस्थःप्राहदेवोमहेश्वरः॥ धर्मार्थकाममोक्षार्थानाग्नेयमधिकृत्य
ले च॥ कल्पांतेगमित्युक्तंपुराणंब्रह्मणास्वयं॥ तदेकादशसहस्रंफाल्गुन्यांयः
प्रयच्छति॥ महावराहस्यपुनर्माहात्म्यमधिकृत्यच॥ विष्णुनाभिहितंक्षोण्यै
तद्वाराहमिहोच्यते॥ मानवस्यतुधर्मस्यमनवेमुनिसत्तमाः॥ चतुर्विंशसहस्रा
णितत्पुराणमिहोच्यते॥ यत्रमाहेश्वरान्धर्मानधिकृत्यचषण्मुखः॥ कल्पेत
त्पुरुषवृत्तचरितैरुपबृंहितं॥ स्कांदंनामपुराणंतदेकाशीतिनिगद्यते॥ सह

लि

Indira Gandhi National
Centre for the Arts

स्याणिशतं प्रोच्येकमितिमर्त्येषु पठ्यते ॥ त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ॥
त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्त्यते ॥ पुराणं दशसाहस्रं कौर्मकल्पानुगं शिवं ॥
यत्र धर्मार्थकामानां मोक्षस्य च रसातले ॥ माहात्म्यं कथयामास कूर्मरूपी जना
र्दनः ॥ इंद्रद्युम्नप्रसंगेन ऋषीणां शक्रसन्निधौ ॥ सप्तदशसहस्राणि लक्ष्मीकल्पा
नुषंगिकं ॥ श्रुतीनां यत्र कल्पादौ प्रवृत्तिं च जनार्दनः ॥ मत्स्यरूपी च मनवे नरसिं
होपवर्णनं ॥ अधिकृत्याब्रवीत्सप्तकल्पवृत्तं मुनिव्रताः ॥ तन्मात्स्यमिति जानीध्वं
सहस्राणि चतुर्दश ॥ यदा च गारुडे कल्पे विश्वांडाद्गरुडो भवत् ॥ अधिकृत्याब्रवी
त्कृष्णो गारुडं तदिहोच्यते ॥ तदष्टादशकं चैव सहस्राणीह पठ्यते ॥ ब्रह्मांडमाहात्म्यमधि
कृत्याब्रवीत्पुनः ॥ तच्च द्वादशसाहस्रं ब्रह्मांडं द्विशताधिकं ॥ भविष्याणां च कल्पानां
श्रूयते यत्र विस्तरः ॥ तद्ब्रह्मांडपुराणं तु ब्रह्मणा समुदाहृतं ॥ चतुर्लक्षमिदं प्रोक्तं ॥३॥

व्यासेनाद्भुतकर्मणा ॥ इदं लोकहितार्थाय संक्षिप्तं द्वापरे द्विजाः ॥ इदमद्यापि देवेषु शतको
टिप्रविस्तरं ॥ उपभेदान्प्रवक्ष्यामि लोके ये संप्रतिष्ठिताः ॥ पाद्मे पुराणे यत्रोक्तं नरसिं
होपवर्णनं ॥ तदष्टादशसाहस्रं नारसिंहमिहोच्यते ॥ नंदाया यत्र माहात्म्यं कार्तिकेये
न कीर्तितं ॥ नंदापुराणं तल्लोके विख्यातमिति कीर्तितं ॥ यत्र शांबं पुरस्कृत्य भविष्येपि
कथानकं ॥ प्रोच्यते तत्पुनर्लोके शांबमेव मुनिव्रताः ॥ एवमादित्यसंज्ञं च तत्रैव परिगी
यते ॥ अष्टादशभ्यस्तु पृथक् पुराणं यत्प्रदृश्यते ॥ विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो
विनिर्गतं ॥ पंचांगानि पुराणस्य आख्यानमितरत्स्मृतं ॥ ब्रह्मविष्ण्वर्करुद्राणां मा
हात्म्यं भुवनस्य च ॥ संहारश्च प्रदृश्येत पुराणे पंचलक्षणे ॥ यो विद्याच्चतुरो वेदान्सांगोप
निषदो द्विजाः ॥ पुराणं च न जानाति न च स्याद्विचक्षणः ॥ अष्टादशपुराणानि कृत्वा
सत्यवतीसुतः ॥ भारताख्यानमकरोद्वेदार्थैरुपबृंहितं ॥ लक्षेणैकेन यत्प्रोक्तं द्वापरे
महात्मना ॥ वाल्मीकिनापि यत्प्रोक्तं रामोपाख्यानमुत्तमं ॥ ब्रह्मणाभिहितं तच्च शतको

तु

Indira Gandhi National
Centre for the Arts

तु लोके त्र धर्मक
टिप्रविस्तरं। आहूय तन्नारदाय तेन वाल्मीकये पुनः॥ वाल्मीकिना
र्मार्थसाधनं॥ एवं सपादपंचैते लक्षाः पुराण्याः प्रकीर्तिताः। पुरातनस्य कल्पस्य पुराणानि विदु
र्बुधाः॥ इतिहासपुराणानि भिद्यंते कालगौरवात्॥ स्कांदे तथा च ब्रह्मांडपुराणं लैंगमेव
च॥ वाराहकल्पे विप्रेंद्रा प्राप्ते तेषां भेदः प्रवर्त्तते॥ अष्टादशप्रकारेण ब्रह्मांडं भिन्नमेव तु॥
अष्टादशपुराणानि तेन जानाति भूतले॥ लैंगमेकादशं विद्ध्यं प्रभिन्नं द्वापरे शुभं॥ स्कां
दं तु सप्तधा भिन्नं वेदव्यासेन धीमता॥ एकादशसहस्राणि सहस्रैकेन संख्यया॥ तस्मा
दाद्यो विभागस्तु स्कंदमहात्म्यसंयुतः॥ माहेश्वरः समाख्यातो द्वितीयो वैष्णवो मतः॥
तृतीयो ब्राह्मणः प्रोक्तः सृष्टिसंक्षेपसूचकः॥ काशीमाहात्म्यसंयुक्तश्चतुर्थः परिपठ्य
पि ते॥ रेवायाः पंचमो भागः सोऽजुन्याः प्रकीर्तितः॥ षष्ठो भागो नेदिनश्वरयोर्माहात्म्यसूच
कः॥ सप्तमो यो विभागः सो स्मृतः प्राभासिको द्विजाः॥ सर्वे द्वादशसाहस्राविभागाः सा
धिकाः स्मृताः॥ अस्मिन्प्रासि॥



Indira Gandhi National
Centre for the Arts